**Purva Mimaansa**
*A Multi-discipinary Bi-annual Research Journal*
*(Peer Reviewed, Refereed)*

*Vol. 10 No. 1-2, March-Sep. 2019*
*ISSN : 0976-0237*
*UGC Approved Journal No. 40903*
*Impact Factor 3.765*

# घटकर्परकाव्यमिति एका यमकचमत्कृतिः

**डॉ. अनिरुद्ध अ.मंडलिक,**

**सारांशः**

संस्कृतसाहित्यं विविधानां विषयानां भाण्डारम् । महाकवि–कालिदासः कवि–भवभूतिः कवि–भासश्चेत्यादीनां कवीनां कलाकृतयः कविप्रतिभाशक्तेः सर्वोत्तमान्युदाहरणानि सन्ति । काव्यकलाकृतिषु काव्यचमत्कृतिदर्शनं कविकल्पनाशक्तिप्रकटनं भावविश्वनिर्मितिश्चेत्यादयो विषयाः कवेः साहित्यनिर्मितेः प्रमुखाः उद्देशाः । संस्कृतसाहित्ये महाकाव्यानि, लघुकाव्यानि, नाटकानि, गीतिकाव्यानि, चम्पूकाव्यानि च एतादृशा नैकाः काव्यप्रकाराः सन्ति द्य कानिचल्ँलघुकाव्यानि सुमधुराणि, गेयानि च । एतादृशेषु काव्येश्वेकं लघु गेयं च काव्यमस्ति कविघटकर्परकविना विरचितं 'घटकर्परकाव्यम्' । इदं शृङ्गाररसपूर्णं काव्यम् ।

अस्मिन्नध्ययने घटकर्परकाव्यस्य परिचयेन सह कवेः काव्यचातुर्यं वर्णयितुं प्रयासोऽस्ति । इदं काव्यं कवेरपूर्वा कलाकृतिरस्ति' द्य स्वयं कविः कथयति, ''यमकयुक्तमिदं काव्यम् । अस्य काव्यस्येव काव्यं कोऽप्यन्यः कविर्न कर्तुं शक्तःद्य यदि केनापीदृशं काव्यं क्रियते, तर्ह्यहं तस्य गृहे घटकर्परेण जलं वहेयम् ।'' कवेरेतादृश आत्मविश्वास एव अस्य काव्यस्य भिन्नत्वं दर्शयति। अन्त्ययमकालङ्कारप्रकारेण युक्तमिदं काव्यमिव अन्यत्काव्यं न दृश्यते, अतोऽस्याध्ययनं भवेदिति चिन्तनम् ।

(Key Words) प्रमुखा बिन्दवः – घटकर्परकाव्यस्वरूपम्, घटकर्परकाव्यस्य संस्कृतसाहित्ये स्थानम्, निसर्गवर्णनम्, यमकालङ्कारः ।

कविघटकर्परकविना' घटकर्परकाव्यम् ' इति नाम्ना गीतिकाव्यं रचितम् द्य अस्मिल्ँलघुकाव्ये द्वाविंशतिः श्लोकाः सन्ति । घटकर्परकवेस्तथा च महाकविकालिदासस्य कालसमानोऽस्तीति विद्वज्जना मन्यन्ते । मेघदूतमिवेदं काव्यं सन्देशकाव्यमस्ति । कथावस्तुतो मेघदूतकाव्यमिव साम्यं दृश्यतेऽस्मिन् काव्ये । मेघदूते मेघद्वारा प्रियकरो यक्षः स्वस्य प्रेयसीं प्रति सन्देशं प्रेषितवान् द्य अत्रापि मेघद्वारैव सन्देशः प्रेषितः, किन्तु प्रेयसी स्वस्य प्रियकराय सन्देशं प्रेषितवती न तु प्रियकरः प्रेयसीं प्रति । वर्षारम्भैव द्वयोरपि काव्योः सन्देशं प्रेषितमस्तीति साम्यम् । मेघदूते नायको नायिकां विना व्याकुलीभूत्वैकवर्षे जीवनं व्यतीतं करोति । अस्मिन् काव्ये नायिका नायकं विना मासत्रयमेव विरहयापनं करोति ।

सर्वकालमतिलङ्घ्य तोयदा आगताःस्थ दयितो गतो यदा ।
निर्घृणेन परदेशसेविना मारयिष्यथ न तेन मां विना ।। घट. ७ ।।

तथा मेघ एव 'दूतः' इति मत्वा कविः वर्णयति –

''हे घनाः ! तं पथिकपांशुलं ब्रूते, यूयमेव पथिशीघ्रलङ्घनाः अद्य अन्येदेशरतिः मुच्यताम् अथवा सा तव वधूः किम् उच्यताम् ।

संस्कृत–विभागः, सङ्गमनेर–नगरपालिका कला, दा. ज. मालपाणि वाणिज्यं, ब. ना. सारडा विज्ञानं महाविद्यालयः, सङ्गमनेरम्, क्षेत्रं दृ अहमदनगरम्, (महाराष्ट्रम्) aniruddhamandlik@gmail-com

*Vol. 10 No. 1-2, March-Sep. 2019*
*ISSN : 0976-0237*
*UGC Approved Journal No. 40903*
*Impact Factor 3.765*

घटकर्परकाव्यमिति विरहगीतं विप्रलम्भशृङ्गाररसेन परिपूर्णं काव्यम् । विरहे दुःखिता नायिका मेघद्वारा मार्गमवरुद्धमिति दृष्ट्वा स्वप्रियकरस्य मेलनार्थमतीव व्याकुला भवति ।

इदं काव्यं कवेरपूर्वा कलाकृतिरस्ति' । कवेरात्मविश्वासः खलु, अस्य काव्यस्येव काव्यं कोऽप्यन्यः कविर्न कर्तुं शक्तःद्य यदि केनाप्यिदृशं काव्यं क्रियते, तर्हि अहं तस्य गृहे घटकर्परेण जलं वहेयम् ।'

भावानुरक्तवनितासुरतैः शपेयम् आलम्ब्य चाम्बु तृषितः करकोशपेयम्

जीयेय येन कविना यमकैः परेण तस्मै वहेयमुदकं घटकर्परेण ।। घट.२२ ।।

अस्य काव्यस्य कविर्घटकर्परोप्रस्ति वा अन्यः ? इति अभ्यासकेष्वेकविचारो नास्ति। के कथयन्ति घटकर्परो नाम कविर्भास एव द्य के वदन्ति इदं काव्यं महाकविकालिदासस्यास्तीति । के मन्यन्ते घटकर्परो नाम कविः राजाविक्रमादित्यस्य नवरत्नेष्वेकः कविः । अस्य कालः ई. स. पू. प्रथमं शतकमिति ।

धन्वन्तरिक्षपणकामरसिंहशङ्कुवेतालभटघटकर्परकालिदासाः ।

ख्यातो वराहमिहिरो नृपतेः सभायां रत्नानिवैवररुचिर्नव विक्रमस्य ।।

अस्यां सप्तषष्टिर्ग्रन्थक्रमाङ्कस्य टीकायामिदानीं काव्यं महाकविकालिदासस्यास्तीति स्पष्टल्लेखः दृश्यते । '' कश्मीरसंस्कृतग्रन्थावलिः द्य ग्रन्थाङ्कः ६७, महाकविकालिदासकृतं घटकर्परकाव्यं ...... । '' (Front Page] Gatakharpara&vivriti by Abhinavagupt)

** The poem which is presented in the following pages is called Ghatakarpara and consists of twenty one stanzas in all- It is called Ghatakarpara because in the concluding stanza the word Ghatakrapara is used by the author who takes a vow that be would voluntarily accept the service] even so mean as that of bearing water in a broken pot of him who defeats him in the art of writing alliterative verses-

The author of the poem according to Abhinavagupta whose commentary accompanies the tet in the present edition] is the famous poet of India] namely] Kalidasa**

अस्य काव्यस्य सन्दर्भे महत्त्वपूर्णः उल्लेखः– **The edition in question forms the 67th issue of the Kashmir Series of Tet and Studies and is based on the transcript] prepared by the copying branch of the Research Department] from the Manuscript of the Raghunatha Temple Library) Jammu.

तथापीदं काव्यं महाकविकालिदासस्यसतीति केऽपि कवयो निश्चयेन न कथयन्ति, अतो 'घटकर्परः' इति नाम्नः केनापि कविना इदं काव्यं रचितमिति विद्वज्जनाः मन्यन्ते ।

कविना पतिविरहेन व्याकुलाया नायिकाया मनोभावनया सह विरहवेदनाया हेतोर्वर्षा–ऋतोर्वर्णनं कृत्वा स्वस्य कल्पनाशक्तिभिः काव्यमाविष्कृतमलङ्कृतं च।

इदं काव्यं निसर्गवर्णनेन परिपूर्णं काव्यम् । निसर्गवर्णने कविना मनोहारी वर्णनं कृतमस्ति। जलतुषाराणां धुलीकणसमूहस्य मेघावरणेन भवितायाः सूर्यचन्द्रयो धुसरप्रभाया च वर्णनं, नीलकण्ठस्य वर्षानृत्यं, मेघाच्छादनेने तारकाविरहितमाकशम्, सेन्द्रधनुघनैः क्रुद्धगजाश्च इत्यादिनि वर्णनानि कविना सम्यग्वर्णितानि । यथा,

हंसा नदन्मेघभयात् द्रवन्ति निशामुखान्यद्य न चन्द्रवन्ति।

नवाम्बुमत्ताः शिखिनो नदन्ति मेघागमे कुन्दसमानदन्ति ।। (घट. २)

मेघागमे हंसा मेघगर्जनेन पलायन्ते तथा मानससरसि कान्तासङ्गाय गच्छन्ति । अद्य रात्रिरचन्द्रा द्य सोऽपि चन्द्रः कान्ताश्वासाय गतः। मयूरा नवजलपातेन प्रहृष्टाः, अतस्ते शब्दायन्ति, केकां कुर्वन्ति च। ते स्वभार्यां मेलनार्थमाह्वयन्ति ।

मेघावृतं निशि न भाति नभो वितारं निद्राभ्युपैति च हरिं सुखसेवितारम्।

सेन्द्रायुधश्च जलदोऽद्य रसन्निभानां संरम्भमावहति भुधरसन्निभानाम् ।।(घट. ३)

मेघैर्व्याप्तमाकाशं तारकाविरहितं न शोभते । मेघा अध आगम्य स्वगर्जनया गजानां क्रोधं जनयति।

हंसपङ्क्तिरपि नाथ सम्प्रति प्रस्थिता वियति मानससम्प्रति ।

चातकोऽपि तृषितोऽम्बु याचते दुःखिता पथिक सा प्रिया च ते ।।६।।

अस्मिन श्लोकेऽपि कविना निसर्गस्य यथारूपं वर्णनं क्रियते । हंसाश्चातकश्च एते खगा आनन्देन सर्वत्रं सञ्चरन्ति । सा हंसपङ्क्तिः स्वनाथमेलनार्थं गच्छति । चातको मानससरोवरं प्रति गछन्नपि पिपासया मेघजलं याचते ।

नीलशष्पमतिभाति कोमलं वारि विन्दति च चातकोऽमलम् ।

अम्बुदैः शिखिगणो विनाद्यते का रतिः प्रिय मया विनाऽद्यते ।।१०।।

अत्र तु अत्यन्तं सुमनोहरं वर्णनं कृतं कविना द्य नीलवर्णं तृणमत्यन्तं सुशोभते द्य चातको विमलजलमिच्छते । मेघसमूहैर्मयूराः केकारवायोद्युक्ताः खलु । अनेन वर्णनेन सह कविरत्र नायिकाया विरहेनोत्पन्नां मनोवेदनामपि वर्णयति द्य नायिकायाः कथनस्य आशयः दृ 'रे प्रिय ! मया विना अद्य कथं मेलनस्य आनन्दः? अहं तु नास्मि भवता सह । भवन्तं विनाहमप्यत्र विरहदुःखेन व्याकुलाऽस्मि, इति भावः। इदं सर्वं वर्णनसौन्दर्यं कविना शब्दालङ्कारयोजनया साधितम् ।

तथा कविना यो यमकालङ्कारस्योपयोगः कृतोऽस्ति सोऽपूर्वः खलु । सम्पूर्णे काव्ययागतानां प्रत्येकश्लोकानां पङ्क्तिषु यमकालङ्कारस्य योजना, इति कवेरपूर्वता खलु । भिन्नेऽर्थे शब्दानां पुनः श्रवणं नाम यमकम् ।

'काव्यप्रकाशः' इति नाम्नो ग्रन्थस्य नवमे उल्लासे कविर्मम्मटः कथयति, 'अर्थे सत्यर्थभिन्नानां वर्णानां सा पुनः श्रुतिः – यमकम् । (सूत्रं,117)

तथा 'श्लोकचरणानामन्त्ये आगतानां शब्दानामावर्तनं नाम अन्त्यानुप्रासः' इति साहित्यदर्पणमिति ग्रन्थस्य कर्ता विश्वनाथोऽन्त्यानुप्रासविषयमनुसृत्य वर्णयति, 'व्यञ्जनं चेद्यथावस्थं सहाद्येन स्वरेण तु ।आवर्ततेऽन्त्ययोज्यत्वादन्त्यानुप्रासैव तत्।'

तथा आचार्यदण्डिना 'कव्यादर्शः' इति काव्ये तृतीये परिच्छेदे यमकालङ्कारस्य विश्लेषणं कृतम् ।

''अव्यपेतव्यपेतात्मा व्यावृत्तिर्वर्णसंहतेः ।

यमकं तच्च पादानामादिमध्यान्तगोचरम् ।।9।।''

अन्यानां वर्णानां व्यवधानेन विना व्यवधानेन युक्तस्य वर्णसमुदायस्य पुनरावृत्तिर्नाम यमकम् । अत्रापि वर्णानां पुनरावृत्तिरेवेति कथिता । दण्डिना 'पुनरावृत्तिः' इति शब्दस्य योजना कृता, तथा मम्मटेनापि 'वर्णानां पुनः श्रुतिः' इति शब्दस्य योजना कृता । द्वयोः शब्दयोरर्थः समान एव 'वर्णानां पुनः श्रवणम्' । अतो यमकं नाम 'वर्णानां पुनः श्रवणम्' इति ।

कविदण्डिना यमकालङ्कारस्य सप्त भेदाः कथिताः,

एकद्वित्रिचातुष्पादयमकानां विकल्पनाः ।

आदिमध्यान्तमध्यान्तमध्याद्याद्यन्तसर्वतः ।।2।।

तेभ्यो भेदेभ्यः कविघटकर्परेण 'अन्तयमकम्' इति प्रकारो योजितास्तीति दृश्यते ।

इत्यादयानां विश्लेषणानां चिन्तनं कुर्मश्चेत्कविघटकर्परेण स्वकाव्ये यमकालङ्कारस्य वान्त्यानुप्रासालङ्कारस्य योजना काव्यसौन्दर्यवर्धनार्थमेव कृतास्तीति दृश्यते । यथा,

निचितं खमुपेत्य नीरदैः प्रियहीनाहृदयावनीरदैः।

सलिलैर्विहतं रजः क्षितौ रविचन्द्रावपि नोपलक्षितौ द्यद्यघट.1।।

अधोरेखिताः शब्दा यमकस्योदाहरणानि ।

अस्य श्लोकस्य प्रथमे चरणे 'नीरदैः' तथा द्वितीये चरणे 'अवनीरदैः' इति शब्दद्वये यमकस्य योजना कविना कृतास्ति द्य 'नीरदैः' इति पदस्य अर्थः 'मेघैः' इति भवति, तथा 'अवनीरदैः' इति पदस्य अर्थः 'चञ्चलं कुर्वाणैः' इति भवति द्य अत्र 'नीरदैः' इति शब्दस्य पुनः श्रुतिरस्ति । किन्तु, शब्दद्वयस्य भिन्नोऽर्थो दृश्यते । तादृशमेव 'क्षितौ', 'नोपलक्षितौ' इति शब्दैः सह तृतीये चरणे चतुर्थे चरणे च यमकस्य योजना कविना कृता । अत्रापि 'क्षितौ', इति पदस्य अर्थः 'पृथिव्यां' तथा च 'नोपलक्षितौ' इति पदस्य अर्थो 'न दृश्येते' इति भवति, इत्यत्रार्थभिन्नेन सह शब्दानां पुनः श्रुतिं द्रष्टुं शक्यते । एतादृशमन्येषु श्लोकेष्वप्यर्थभिन्नेन सह शब्दपुनः श्रुतिः दृश्यते ।

'नोपलक्षितौ' इत्यत्र 'क्षितौ' इति शब्दः स्वतन्त्ररूपेणार्थं न प्रकटयति द्य सः तु 'उपलक्षितौ' इति शब्दस्याङ्गं, किन्त्वत्र शब्दानां भिन्नार्थे पुनःश्रुतिः दृश्यते, अतोऽत्र यमकम् द्य एतादृशं सर्वत्रं ज्ञायेत ।

| अनु.क्र. | यमकरूपं (प्रथमचरणं) | यमकरूपस्य अर्थः | यमकरूपं (द्वितीयचरणं) | यमकरूपस्य अर्थः | श्लोकक्रमाङ्कः / पङ्क्तिक्रमाङ्कः |
|---|---|---|---|---|---|
| ०१ | नीरदैः | मेघैः | अवनीरदैः | चञ्चलं कुर्वाणैः | १/१ |
| ०२ | क्षितौ | पृथिव्यां | नोपलक्षितौ | न दृश्येते | १/२ |

| | | | | | |
|---|---|---|---|---|---|
| ०३ | द्रवन्ति | पलायनं कुर्वन्ति | न चन्द्रवन्ति | चन्द्रं विना | २/१ |
| ०४ | नदन्ति | केकारवं कुर्वन्ति | कुन्दसमान-दन्ति ! | कुन्दपुष्पसमानाः दन्ताः यस्याः, हे! | २/२ |
| ०५ | नगेषु | पर्वतेषु | स्वनदम्भोधरभीत-पन्नगेषु | मेघगर्जनया भीतैः सर्पैः युक्तम् | ४/१ |
| ०६ | दरीषु | कन्दरेषु | अद्भुतरूपसुन्दरीषु | अभूतपूर्वरूपसुन्दरी तासु | ४/२ |

उपरस्थैरुदाहरणैः सह केषाञ्चनुदाहरणानां विश्लेषणं वर्गीकरणं च अग्रिमे प्रकोष्ठे कृतम

इत्यस्मिन् प्रकोष्ठे त्रीषु श्लोकेषु उदाहरणानि उद्धधृतानि। अत्र द्रष्टुं शक्यते यत् प्रत्येके चरणे कविना सम्यक्तया यमकालङ्कारस्य योजना कृतास्ति । 'द्रवन्ति', 'चन्द्रवन्ति', 'नदन्ति', 'कुन्दसमान–दन्ति', 'नगेषु', 'स्वनदम्भोधरभीत–पन्नगेषु', 'दरीषु', 'अद्भुतरूपसुन्दरीषु' एतानि श्लोकस्थानि सर्वानि पदानि भिन्न–भिन्नर्थेषु यमकार्थे काव्यस्य सौन्दर्यं प्रकटीकुर्वन्ति काव्यमलङ्कुर्वन्ति च ।

सम्पूर्णे काव्ये कवेर्भाषा भावमय्यस्ति द्य विरहव्याकुलाया नायिकाया मनोभावा हृदयहारिणो दृष्यन्ते। तथा महाकविकालिदाससदृष्यैव कविना घटकर्परेणापि प्रकृतिवर्णनेषु मानवभावनानामारोपः कृतःद्य काव्यरचनायां वृत्तवैविध्यं द्रष्टुं शक्यते, यथा वैतालीयं, इन्द्रवज्रा, उपजातिः, वियोगिनी, अनुक्तगाथा च एतादृशेषु वृत्तेषु श्लोकाः रचितास्तेन काव्यं गेयं मधुरं चाभवत्। तथा च यमकेन सहान्यानामलङ्काराणामुपयोगोऽपि काव्यस्य माधुर्यं वर्धयति । किन्तु, यमकाश्रयेन काव्यं चमत्कृतिपूर्णं जातमिति मन्ये, तथा च काव्यस्यापूर्वता वर्धिता इति । संस्कृते बहूनि काव्यानि सन्ति, किन्तु सम्पूर्णतया यमकेन युक्त मे क मेव काव्यं नाम घटकर्परकाव्यमिति मन्ये ।

**इदं काव्यं दूतकाव्यस्योत्तममुदाहरणं भवितुमर्हति द्य अस्याव्यस्याध्ययनमभ्यासकानां कृते नूतनो मार्ग एव द्य दूतकाव्यस्य गीतिकाव्यस्य चाध्ययनायोत्तमं दिशादर्शकमेतत्काव्यं खल्विति मन्ये ।**

**ऋणनिर्देशः**

*Vol. 10 No. 1-2, March-Sep. 2019*
*ISSN : 0976-0237*
*UGC Approved Journal No. 40903*
*Impact Factor 3.765*

## सन्दर्भग्रन्था

१) गद्रे, रा. ना. (१६६०). साहित्यदर्पण, पुणे, आयडियल बुक सर्व्हिस.

२) गुप्त, धर्मेशकुमार. (२००६). आचार्य दण्डिविरचितः काव्यादर्शः, नई दिल्ली, मेहरचन्द लछमनदास पब्लिकेशंस्.

३) दाहाल, लोकमणि. (२०००) साहित्यदर्पणः, वाराणसी, चौखम्बा सुरभारती प्रकाशनम्.

४) मंडलिक, अ. अ. (२०१४). घटकर्परकाव्यम्, गुडगांव, अक्षरी प्रकाशनम्.

५) शर्मा, उमेशचन्द्र एवं शर्मा, गिरीशचान्द्र. (१६७५). अलीगढ, विवेक पब्लिकेशन्ज.

६) शास्त्री, रामपाल. (१६७१). घटकर्परकाव्यम्, वाराणसी, चौखम्बा संस्कृत सीरीज ऑफिस.

७) सिंह, सत्यव्रत. काव्यप्रकाशः, (२००१) वाराणसी, चौखम्बा सुरभारती प्रकाशनम्.

८) https%@@archive-org@---@ GhatakaparaKavyaOfKalidasaWithAbihnavaGuptaCommentary